१३
17

अथ

२३
१८

ग्रन्थनामः-	"मैत्रायणीयोपनिषत्"	
कर्तृनामः-	...	

विषयः- वैदिकसाहित्यम्"

186

Mytrayaniyoupanishad.

Vedica Sahityam.

नमः सवित्रे जगदेकच॰ नमः। ॐ नमो ब्रह्मणो नमः॥

१३
१७

१८०

मैत्रायणीयोपनिषदारंभः

नं ६४

१३
17

१३
17

मैत्रायणी

पूर्वकाले चयनाद्विकर्म विष्णुपूजनं

श्रीलक्ष्मीनृसिंहायनमः। ॥ब्रह्मयज्ञोवाएषयत्पूर्वेषांचयनंतस्मात्‌यजमानश्चित्वैतानग्नीनात्‌
मानमभिध्यायेत्‌संपूर्णः खलुवाअद्धाविकलःसंपद्यतेयज्ञः कःसोभिध्येयोयंयःप्राणाख्यस्तु
स्योपाख्यानं।१।बृहद्रथोवैनामराजाविराज्येपुत्रंनिधापयित्वेदमशाश्वतंमन्यमानःशरी
रंवैराग्यमुपेतोरण्यंनिर्जगामसतत्रपरमंतपआस्थायादित्यमुदीक्ष्यमाणऊर्द्ध्वबाहुस्तिष्ठ
त्यंतेसहस्राहस्यांतिकमाजगामाग्निरिवाधूमकस्तेजसानिर्दहन्निवात्मविद्भगवान्शाकायन्य
उत्तिष्ठोत्तिष्ठवरंवृणीष्वेतिराजानमब्रवीत्सतस्मैनमस्कृत्योवाचभगवन्नाहमात्मवित्त्वंतत्त्ववि
च्छुश्रुमोवयंसत्वंनोब्रूहीत्येतद्वृत्तंपुरस्तात्‌दुःशक्यमेतत्‌प्रश्नमैक्ष्वाकान्यान्कामान्वृणीष्वेति
शाकायन्यःशिरसास्यचरणावभिमृश्यमानोराजेमांगाथांजगाद।२।भगवन्नस्थिचर्मस्नायुम
ज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रपित्तकफसंघातेदुर्गंधेनिःसारेस्मिञ्छ
रीरेकिंकामोपभोगैः।कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसंप्रयोगःक्षुत्पि

स्थूल १लिंगधर्मा २नेत्रमल

पामाज्वरामृत्युरोगशोकाद्यैरभिहतेस्मिञ्छरीरे किं कामोपभोगैः ।३। सर्वं चेदं क्षयिष्णु पश्या
मो यथेमे दंशमशकादयः । तृणवनस्पतयोद्भूतप्रध्वंसिनोथ किमेतैर्वा परेन्ये महाधनुर्ध
राश्चक्रवर्त्तिनः केचित्सुद्युम्नभूरिद्युम्नेंद्रद्युम्नकुवलयाश्वयौवनाश्ववध्र्यश्वाश्वप
तिः शशबिंदुर्हरिश्चंद्रोंबरीषो ननक्तुः शर्यातिर्ययातिरनरण्योक्षसेनादयोथ मरुत्तभरतप्र
भृतयो राजानो मिषतो बंधुवर्गस्य महतीं श्रियं त्यक्त्वास्माल्लोकादमुं लोकं प्रयाता इत्यथ
किमेतैर्वा परेन्ये गंधर्वासुरयक्षराक्षसभूतगणपिशाचोरगग्रहादीनां निरोधनं पश्यामो
ऽथ किमेतैर्वान्यानां शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं व्रश्चनं वात
रज्जूनां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणामित्येतद्विधेस्मिन्संसारे किं कामोप
भोगैर्यैरेवाश्रितस्यासकृदिहावर्त्तनं दृश्यत इत्युद्धर्तुमर्हसीत्यंधोदपानस्थो भेक इवाह
मस्मिन्संसारे भगवंस्त्वं नो गतिस्त्वं नो गतिः ।

निरोदककूपः

मैत्रायणी

प्रथमः प्रपाठकः ॥ अथ भगवानुशाकायन्यः सुप्रीतस्त्वमब्रवीद्राजानं महाराज बृहद्रथेक्ष्वाकुवंशध्वज
शीघ्रमात्मज्ञः कृतकृत्यस्त्वं मरुन्नाम्नेति विश्रुतोसीत्ययं वाव खल्वात्मा ते यः कतमो भगवानिति तं
होवाचेति १ अथ य एषोच्छ्वासाविष्टंभनेनोर्ध्वमुत्क्रान्तो व्यथमानोव्यथमानस्तमः प्रणुदत्येष आत्मेत्याह
भगवान्मैत्रिरित्येवं ह्याहाथ य एष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपे
णाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति २ अथ खल्वियं ब्रह्मविद्या सर्वोपनिष
द्विद्या वा राजन्नस्माकं भगवता मैत्रिणा व्याख्याताहं ते कथयिष्यामीत्यथापहतपाप्मानस्तिग्मतेजस ऊ
र्ध्वरेतसो वालखिल्या इति श्रूयंतेथ क्रतुं प्रजापतिमब्रुवन् भगवन् शकटमिवाचेतनमिदं शरीरं क
स्यैष खल्वीदृशो महिमातीन्द्रियभूतस्य येनैतद्विधमेतच्चेतनवत्प्रतिष्ठापितं प्रचोदयिता वास्य भ
गवन्वेत्सि तदस्माकं ब्रूहीति तान्होवाचेति ३ यो ह खलु वावोपरिस्थः श्रूयते गुणेष्विवोर्ध्वरेतसः

३ विविध वासना वासना वासितांतःकरण

२ संघातोर्ध्व

३ मुक्तम

१ प्रपंचस्योपरि निष्प्रपंचे ... सर्वातीतो साक्षी

संबोधन

१ ... उपरि स्थित एव प्रपंचातर ... अप्रसंगत एव ...

मैत्रायणीय

प्रवेशप्रकार: — २ उपाधि [illegible] प्राणाद्यरूपं

प्रति: [illegible] २ [illegible]

ॐ

सता इमे वाप्रबुद्धा अप्राणाः स्थाणुरिव तिष्ठमाना अपश्यत स नारमत सो ऽमन्यत तासां प्रतिबोधना
याभ्यंतरं विविशानीति स वायुरिवात्मानं कृत्वाभ्यंतरं प्राविशत् स एको नाशक्नोत् स पंच
धात्मानं विभज्योच्यते यः प्राणो ऽपानः समान उदानो व्यान इत्यथ यो ऽयमूर्ध्वमुत्क्रामत्येष वा
व स प्राणो ऽथ यो ऽयमवाङ् संक्रामत्येष वाव सो ऽपानो ऽथ येन वा एता अनुगृहीता इत्येष वाव स व्यानो ऽथ यो
यं [illegible] स्थविष्ठो धातुरन्नस्यापाने प्रापयत्यणिष्ठो वाङ्गे ऽङ्गे समानयत्येष वाव स समानसं
ज्ञा उत्तरं व्यानस्य रूपं चैतेषामंतरा प्रसूतिरेवोदानस्याथ यो ऽयं पीताशितमुद्गिरति निगिरतीति वै
ष वाव स उदानो ऽथोपांशुरंतर्याममभिभवत्यंतर्याममुपांशुं चैतयोरंतरा देवो ऽष्ण्यं प्रासुवत् यदौ
ष्ण्यं स पुरुषो ऽथ यः पुरुषः सो ऽग्निर्वैश्वानरो ऽन्यत्राप्युक्तमयमग्निर्वैश्वानरो यो ऽयमंतः पुरुषे

२ मह: मह: १ नेन प्राणापानौ गृह्ये — प्राणरूपेणानियंतृत्वं [illegible] — [illegible] चेतयितृत्वं [illegible] १

परस्पर संधानपातिः

सर्वं धातुं धातुजातं [illegible] नपतिः [illegible] विश्वं सर्वं [illegible] नपति [illegible] नपति

२ उपदेशः ... प्रश्नः

सवा एष शुद्धः पूतः शून्यः शांतोऽप्राणो निरात्मानंतोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतंत्रः स्वे महिम्नि तिष्ठत्यनेनेदं शरीरं
चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति ते होचुर्भगवन् कथमनेनेदृशेनानिष्ठेनैतद्विधमिदं चेतन
वत्प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान् होवाच ।४। स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसं
ज्ञोऽबुद्धिपूर्वमिहैवावर्ततेंऽशेनेति सुप्तस्येवाबुद्धिपूर्वं विबोधो यथैवमित्यथ यो ह खलु वावैतस्य
सोंऽशोऽयं यश्चेतनामात्रः प्रतिपुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिंगः प्रजापतिर्वि
श्वाख्यस्तेन चेतनेनेदं शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽस्यप्येतीति ते होचुर्भगवन् यद्य
नेनेदृशेनानिष्ठेनैतद्विधमिदं चेतनवत्प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान् होवा
चेति ।५। प्रजापतिर्वा एकोऽग्रेऽतिष्ठत् स नारमतैकः स आत्मानमभिध्यात्वा बह्वीः प्रजा असृ

१ आलोचनेन

3

नेदमिमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्
भवति नैनं घोषं शृणोति स वा एष पंचधात्मा ॥ ८ ॥ चित्तं निहितो गुहायां मनोमयः प्राणशरी
रो भारूपः सत्यसंकल्प आकाशात्मेति स वा एषोऽस्मात् हृदयांतरादुत्क्रान्तो यो मन्यतार्थानश्ना
त्यतः खानीमानि भित्त्वोदितः पंचभी रश्मिभिर्विषयानत्तीति बुद्धींद्रियाणि यानीमान्येतान्यस्य
रश्मयः कर्मेंद्रियाण्यस्य हयाः रथः शरीरं मनो नियंता ऽहंकृतिमयोऽस्य प्रतोदो नेन खल्वीरितं
परिभ्रमतीदं शरीरं चक्रमिव मृत्पिंडे नेदं ॥ ९ ॥ शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता वै सोऽप्य
स्येति ॥ १ ॥ स वा एषोऽत्मेति होशति कवयः सितासितैः कर्मफलैरनभिभूत इव प्रतिशरीरेषु चरत्यव्य
क्तत्वात् सौक्ष्म्याद् दृश्यत्वादग्राह्यत्वान्निर्ममत्वाच्चानवस्थोऽस्मि कर्तृत्वाकिनैवाकर्ता; स वा एष शु
द्धः स्थिरोऽचलश्चालेप्योऽव्यग्रो निस्पृहः प्रेक्षकवद्व्यवस्थितः स्वस्थश्च सततशुक्गुणमयेन पटेनात्मा

ति।२।=अस्ति खल्वन्योऽपरो भूतात्मा योऽयं सितासितैः कर्मफलैरभिभूयमानः ~~परिभ्रमतीति~~ सदसद्योनि-
मापद्यत इत्यवाच्यो ऊर्ध्वां वा गतिं द्वंद्वैरभिभूयमानः परिभ्रमतीत्य २

तेमंतर्यावस्थितस्त त्यवस्थिताद्धति।७। द्वितीयप्रपाठकः।३। ते होचुर्भगवन् यद्येवमस्यात्मनो महि-
मानं सूचयसीत्यन्यो वा परः कोऽयमात्माख्यो २ योऽयं सितासितैः कर्मफलैरभिभूयमानः सदस-
द्योनिमापद्यता इत्यवाच्यो ऊर्ध्वां वा गतिं द्वंद्वैरभिभूयमानः परिभ्रमतीति अस्योप-
व्याख्यानं पंचतन्मात्राभूतशब्देनोच्यंते तथ पंच महाभूतानि भूतशब्देनोच्यंते अथ ते-
षां समुदायस्तच्छरीरमित्युक्तमथ यो ह खलु वाव शरीरमित्युक्तं स भूतात्मेत्यु-
क्तमथामृतोऽस्यात्मा बिंदुरिव पुष्करा इति स वा एषोऽभिभूतः प्राकृतैर्गुणैरित्यतोऽभि-
भूतत्वात्संमूढत्वं प्रयातः संमूढत्वादात्मस्थं प्रभुं भगवंतं कारयितारं ना-
पश्यद्गुणौघैरुह्यमानः कलुषीकृतश्चास्थिरश्चंचलो लुप्यमानः सस्पृहो व्यग्र

३ चिदात्मा भूतात्मा वस्तुतोनन्ये इति हि भूतात्माकर्मतत्सारं प्रश्नति

२ इत्यर्थे ३ ऊर्ध्वाधर्यौ। रूपात्मवतया अन्या भिन्नादि १ पक्षी वा कोरा कोटराका

वाभिमानित्वं प्रयाता इत्यर्थः ६ सोभिमन इत्येवं मन्यमानो निबध्नात्यात्मनात्मानं जालेनेव खचरः ततस्य
उक्तैरभिभूयमानः सदसद्योनिमापद्यत इत्यधो वा चोर्ध्वा वा गतिर्द्वंद्वैरभिभूयमानः [illegible]
परिभ्रमतीति कतम एष इति नानूहोवाचेति॥२॥ अथान्यत्राप्युक्तं ६ यः कर्ता ३ सोयं वै भूतात्मा कर
णैः कारयितांतः पुरुषोऽथ यथाग्निनायस्पिंडो वाभिभूतः कर्तृभिर्हन्यमानो नानात्वमुपैत्येवं
वाव खल्वसौ भूतात्मांतःपुरुषेणाभिभूतो गुणैर्हन्यमानो नानात्वमुपैति चतुर्जालं चतुर्दश
विधं चतुरशीतिधा परिणतं भूतगणमेतद्वै नानात्वस्य रूपं तानि ह वा एतानि गुणानि पुरुषे
रितानि चक्रमिव मृत्पचेनेत्यथ यथायस्पिंडे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषोऽभि
भूयत्ययं भूतात्मोपसंश्लिष्टत्वादिति॥ अथान्यत्राप्युक्तं ६ शरीरमिदं मैथुनादेवोद्भूतं संविदपेतं नि
रय एव मूत्रद्वारेण निःक्रांतमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रपित्तकफमज्जामे

२ शरीरसंघात वैराग्यं दर्शयति २
सहजावेन

मैत्रापत्री

दीवसाविरन्यैश्चामयैर्बहुभिः परिपूर्णः कोशइववसुनेति ॥४॥ अथान्यत्राप्युक्तं संमोहो भयं विषादो निद्रा तन्द्री प्र
मादो [illegible] जराशोकः क्षुत्पिपासा कार्पण्यं क्रोधो नास्तिक्यमज्ञानं मात्सर्यं नैःकारुण्यं मूढत्वं निर्व्रीडत्वं निरा
कृतित्वमुद्धतत्वमसमत्वमिति तामसान्वितस्तृष्णा स्नेहो रागो लोभो हिंसा रतिर्दृष्टिर्व्यापृतत्वमीर्ष्या
काममस्थिरत्वं चलत्वं व्यग्रत्वं जिगीषार्थोपार्जनं मित्रानुग्रहणं परिग्रहावलंबोऽनिष्टेष्विंद्रियार्थेषु द्वि
ष्टिरिष्टेष्वभिष्वंगः शुक्तस्वरोऽन्नतमस्त्विति राजसान्वितैः परिपूर्ण एतैरभिभूत इत्ययं भूतात्मा तस्मा
न्नानारूपाण्याप्नोतीत्याप्नोति । तृतीयप्रपाठकः ॥ ते ह खलु वावोर्ध्वरेतसोऽतिविस्मिता अभि
समेत्योचुर्भगवन्नमस्तेऽस्तु त्वं नः शाधि त्वमस्माकं गतिरन्या न विद्यत इत्यस्य को विधिर्भूतात्मनो ये
नेदं हित्वात्मन्येव सायुज्यमुपैति ॥१॥ अथान्यत्राप्युक्तं महानदीषूर्मय इवानिवर्तकमस्य यत्पु
राकृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैः पाशैः पंगुरिव बद्धं बंध

श्री
५

३ पुस्त्रीहं

१ पीसाचं गृहीतइव मादेवान…

नष्टैवास्वातंऽयमविषयस्वस्यैवानुभवयावस्य मदिरोन्म‍त्तइव मोहमदिरोन्मत्तंपाप्मनागृहीतइव
त्राम्यमाणोमहोरगदष्टइव विषयदष्टं महांधकारमिवरागांधमिंद्रजालमिमायामयं स्वप्न
इवमिथ्यादर्शनं कदलीगर्भइवासारं नष्टइव तृणोवेषं चित्रमिवमिथ्यामनोरथमित्यपयोक्तं ।
शाब्दस्पर्शादियोद्धयामिति अनर्थइवास्थिता:। येषां सक्रस्वनूतात्मानस्मरेत परंपदं ।२। अयं
यावरचस्यप्रवृत्तिविधिर्नूतामनोयथेद विद्याधिगमः स्वधर्मस्यानुचरणं स्वाश्रमेषेवानुकर्म
णांस्वधर्मस्यवाफलद्वत्तं स्तंबशारवेचेतराण्यनेनाधर्मागृन्वत्यन्यथावाडित्येषस्वधर्मोसि
हितोयोवेदेषुनस्वधर्मोतिकर्मेणाश्रमीस्वल्पोश्रमेष्वेवानवस्थस्तपस्वीवेत्यच्यताइत्येतदयु
क्तंनातपःस्कस्यात्म ज्ञानेधिगमःकर्मसिद्धिर्वेत्येवं ह्यहातपसाप्राप्यतेसत्वंसत्वात्सं
प्राप्यतेमनः।मनसः प्राप्यतेह्यात्मायमा… स्यानानिवर्त्तताइति।३। अस्तिब्रह्मेतिब्रह्मविद्याविं

१ विवेक विज्ञान

संसार मज्जे २

३ ननु आत्मनेश्चात्तपसाप्राप्यते

२ कर्मसिद्धिः पर्यायोवाकर्म

२ मनसश्चेंद्रियाणांएकाग्र्यंपरंतपः। सज्यायांसर्वधर्मेभ्यः सधर्मः परउच्यते।

१ उक्तसर्वधर्मेतराश्रियदं ५ त्वा तपःप्रावल्यादि ततः प्राप्तावेति ता:

१ कर्म उपासनया चिंतनं

१ हिरण्यगर्भात् परं ब्रह्म

१ उपरि

देववी ब्रह्मवादिनमिदमित्येवैतदाह यस्तपसापहतपाप्मा ॐ ब्रह्मणो महिमेत्येवैतदाह यः सुयुक्तोऽज
स्रं चिंतयति तस्माद्विद्यया तपसा चिंतया चोपलभ्यते ब्रह्म स ब्रह्मणः पर एता भवत्याधिदैवत्वं देवे
भ्यश्चेत्यक्षय्यमपरिमितमनामयं सुखमश्नुते य एवं विद्वाननेन त्रिकेण ब्रह्मोपास्ते यैः परिपू
र्णोभिभूतोयं रथितश्चैवं तैर्विमुक्तश्चात्मन्येव सायुज्यमुपैतीत्याते हे ब्रुवन्भगवन्नभिवादयसीत्य
भिवादयसीति निहितमस्माभिरेतद्यथावदुक्तमनसीत्यथोत्तरं प्रश्नमनुब्रूहीत्यग्निर्वायुरादि
त्यः कालो यः प्राणोन्नं ब्रह्मा रुद्रो विष्णुरित्येकेन्यमभिध्यायंत्येकेन्यं श्रेयः कतमो यः सोऽस्मा
कं ब्रूहीति तान्होवाचेति ब्रह्मणो वावैता अग्र्यास्तनवः परस्यामृतस्याशरीरस्य तस्यैव लोके
प्रतिमोदतीह यो यस्यानुषक्त इत्येवं ह्याह ब्रह्म खल्विदं वाव सर्वं या वास्या अग्र्यास्तनवस्ता अ
भिध्यायेदर्चयेन्निह्नुयाच्चातस्ताभिः सहैवोपर्युपरि लोकेषु चरत्यथ कृत्स्नक्षय एकत्वमेति पुरुषस्य पु

उपासना

विद्यातपश्चिंतन

निर्गुणं ब्रह्म

तादेवताभिः

तद्देवता

श्री
६

वृत्तमाला
उक्तरूपासनाऽगनमस्कारं ददमंगान्ऽऽहं १

ब्रह्मणोभिन्नदेवतानांरुद्रादीनामुपासकः पंचाग्नि
ऽध्वमेधया।लिंग।चरित दिनागतापिंग।वर्तंतेरति ३ त्वमायत्ता लोकस्य उ
१ उपाधितः

रुपस्या६।चतुर्थः प्रपाठकः।अथयथेयंकोत्सायनीस्तुतिः।त्वंब्रह्मात्वंचवैविष्णुस्त्वंरुद्रस्त्वंप्रजापतिः।
त्वमग्निर्वरुणोवायुस्त्वमिंद्रस्त्वंनिशाकरः।त्वमन्नंस्त्वंयमस्त्वंपृथिवीत्वंविश्वंत्वमथाच्युतः।स्वार्थे
श्रातिकः स्वाभाविकेर्थेचबहुधासंस्थितिस्त्वयि।विश्वेश्वरनमस्तुभ्यंविश्वात्माविश्वकर्मकृत्।विश्वभुग्विश्व
मायुस्त्वंविश्वक्रीडारतिप्रभुः।नमःशांतात्मनेतुभ्यंनमोगुह्यतमायवै।अचिंत्यायाप्रमेयायअनादि
...।कारणोव्रहती निधनायवै।१।तमोवाइदमग्रआसीदेकंतत्परेस्यात्तत्परेणेरितंविषमत्वंप्रयात्येतद्रूपंऽवैरज
स्तद्रजःखल्वीरितंविषमत्वंप्रयात्येतद्वैसत्वस्यरूपंतत्सत्वमेवेरितंरसःसंप्रास्रवत्सोऽशो
प्रतिबिंबः यऽयश्चेतनामात्रःप्रतिपुरुषःक्षेत्रज्ञःसंकल्पाध्यवसायाभिमानलिंगःप्रजापतिर्विश्वे...स
स्यप्रागुक्ताएतास्तनवोथयोहखलुवावास्यतामसोऽशोसौसब्रह्मचारिणोयोयंरुद्रोथयोह
खलुवावास्यराजसोऽशोसौसब्रह्मचारिणोयोयंब्रह्माथयोहखलुवावास्यसात्विकोऽशोसौ
हे हे

उक्तपार्थ
प्रादिचतुष्टय
स्थानः।८

इ द्विधावा एष: ९

१ प्राणिसमूहरूपे ब्रह्माविष्णुरुद्र पंचभूतात्मना आदित्यरूपेण २ सर्वव्यवहारदृष्ट्या मनैकादशेंद्रियः बुद्धिभिः नानारूपैः

सत्वसंचारितो।२।योयं विष्णुः स वा एष एकधा त्रिधा भूता द्वधे कादशधा द्वादशधा परिमितधा वो
द्भूत उद्भूतत्वाद्भूतं भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूवेत्यसावात्मांतर्बहिश्चां
तर्बहिश्च।।२।।पंचमः प्रपाठकः।। द्विधा वा एष आत्मानं बिभर्त्ययं यः प्राणो यश्चासावा
वादित्योथ द्वौ वा एतावस्य पंथाना अंतर्बहिश्चाहोरात्रेणैतौ व्यावर्त्तेते असौ वा आदित्यो बहिरा
त्मांतरात्मा प्राणोतो बहिरात्मगत्यांतरात्मनोनुमीयते गतिरित्येवं ह्याह। अथ यः कश्चिद्वि
द्वानपहतपाप्माक्षाध्यक्षोवदातमनास्तन्निष्ठ आवृत्तचक्षुः सोंतरात्मगत्या बहिरा
त्मनोनुमीयते गतिरित्येवं ह्याह। अथ य एषोंतरादित्ये हिरण्मयः पुरुषो यः पश्यतीमां हिर
ण्यवत्स एषोंतरे हृत्पुष्कर एवाश्रितोन्नमत्ति। अथ य एषोंतरे हृत्पुष्कर एवाश्रितो
न्नमत्ति स एषोग्निर्दिवि श्रितः सौरः कालाख्योदृश्यः सर्वभूतान्यन्नमत्तीति कः पुष्करः किं म

२ प्राणानुवादेन
आदित्यात्मा ६

वा / द्वयोरात्मादेवता / [illegible] / [illegible]

श्री

उद्गीथ२ नवार्णे रेनात्म

योवेतीदं वाचनसुष्करं यो वमा।क।शोस्येमा स्वतंस्वेदिश श्वतस्वउपदिशो दलसं स्त्वाआस
ह्रपन्मत मर्वा गूा वि च रत एतो प्राणादित्या एता उपासीतोमित्येतदक्षरेणाव्याहृतिभिः सावित्र्या चेति।२।
द्वेवाव ब्रह्मणो रूपे मूर्तं चामूर्तं चा अथ यन्मूर्तं तदसत्यं यदमूर्तं तत्सत्यं स ब्रह्म यद्ब्रह्म तत्
ज्योतिर्यज्ज्योतिः स आ दित्यः स वा एष ओमित्येतदा त्माभवत् स त्रेधात्मानं व्यकुरुत ओ
मिति। तिस्रो मात्रा एताभिः सर्वमिदमोतं प्रोतं चैवास्मीत्येवं ह्याहैतद्वा आदित्य ओमित्ये
वं ध्यायतात्मानं युंजीतेति।३। अथान्यत्राप्युक्तम् अथ खलु य उद्गीथः स प्रणवो यः
प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव इत्येवं ह्याहोद्गीथं प्रणवा
प्रवर्तितार ख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं त्रिपदं त्र्यक्षरं पुनः पंचधा ज्ञेयं निहितं गुहा मनोमयप्राण शरी तेनासूर्योप्रकाशा
यामित्येवं ह्याहोर्ध्वमूलं त्रिपाद् ब्रह्म शाखा आकाशवाय्वग्न्युदकभूम्यादय एकोऽश्वत्थ

परमात्मा१ स्थावर जंगमात्मा२ आकाशादि३ ब्रह्मणा ब्रह्मनामाही
विकाररहित सूर्यादि२
आकादयो विकारः१

३ उपास्यस्यात्मनो गुणांतरं

नामैतत् ब्रह्मैतस्यैतत्तेजो यदसावादित्य ॐ इत्येतदक्षरस्य वैतत्तस्मादोमित्यनेनैत
दुपासीताजस्रमित्येको स्य संबोधयितेत्येवं ह्याह ॥ एतदेवाक्षरं पुण्यमेतदेवाक्षरं पर
एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ ४ ॥ अथान्यत्राप्युक्तं स्वनवत्येषास्य तनूर्य ॐ इ
ति स्त्रीपुंनपुंसकेति लिंगवत्येषाग्निर्वायुरादित्य इति भास्वत्येषाथ ब्रह्मा रुद्रो विष्णुरित्यधि
पतिवत्येषाथ गार्हपत्यो दक्षिणाग्निराहवनीय इति मुखवत्येषाथ ऋग्यजुः सामेति विज्ञा
नवत्येषाथ भूर्भुवः स्वरिति लोकवत्येषाथ भूतं भव्यं भविष्यदिति कालवत्येषाथ प्राणोग्निः
सूर्य इति प्रतापवत्येषाथान्नमापश्चंद्रमा इत्याप्यायवत्येषाथ बुद्धिर्मनोहंकार इति चेतन
वत्येषाथ प्राणोपानो व्यान इति प्राणवत्येषेत्यत ॐ इत्युक्तेनैताः प्रस्तुता अर्चिता अर्पिता
भवंतीत्येवं ह्याहैतद्वै सत्यकाम परं चापरं च ब्रह्म यदोमित्येतदक्षरमिति ॥ ५ ॥ अथाव्याहृतं

व्याहृतं

२ स्तनवत्याद्यात्मनवौ

वाग्स्मासीत्स सत्यं प्रजापतिस्तपस्तप्त्वानुव्याहरत्भूर्भुव [illegible] स्वरित्येषैव वास्य प्रजापतेः स्थविष्ठा तनु
र्यो लोकवतीति स्वरित्यस्याः शिरो नाभिर्भुवो भूः पादा आदित्यश्चक्षुरायत्ता हि पुरुषस्य महती मात्रा च
क्षुषा ह्ययं मात्राश्चरति सत्यं वै चक्षुरक्षिण्यवस्थितो हि पुरुषः सर्वार्थेषु चरति एतस्माद्भूर्भुवः स्व
रित्युपासीतानेन हि प्रजापतिर्विश्वात्मा विश्वचक्षुरिवोपासीते [illegible] प्रजापतिर्विश्वात्मा विश्वचक्षु
रिवोपासीतो भवति त्येवं ह्याह एषा वै प्रजापतेर्विश्वभृत्तनूरेतस्यामिदं सर्वमन्तर्हितमस्मिंश्च सर्वस्मि
न्नेषान्तर्हितेति तस्मादेषोपासीतेति ॥६॥ तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः स विता स वा एवं प्रव
रणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनोऽथ भर्गो देवस्य धीमहीति सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं
चिन्तयामीत्याहुर्ब्रह्मवादिनोऽथ धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्ता योऽस्माकं प्रचोदयादि
त्याहुर्ब्रह्मवादिनोऽथ भर्गा इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकोऽक्षिणि वैष भर्गाख्यो भा
भिर्गतिरस्य हीति । भर्गः भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनोऽथ भ इति भासयती मान् लोका

प्रसूत्वा नरइतिरंजयतीतीमानिभूतानिगइतिगछंत्यस्मिन्नागछंत्यस्मादिमाः प्रजास्तस्मात् भरगत्वा
द्भर्गः शश्वत्स्तूयमानात्सूर्यः सवनात्सविता दानादादित्यः पवनात्पावनोऽथापोऽप्याय
नादित्येवं ह्याह खल्वात्मनोऽत्मा नेतामृताख्यश्चेता मंता गंता स्रष्टानंदयिता कर्ता वक्ता रसयिता द
२ घ्राता द्रष्टा श्रोता स्पृशति च विभुर्विग्रहे संनिविष्ट इत्येवं ह्याह अथ यत्र द्वैतीभूतं विज्ञा
पश्यति नं तत्र हि शृणोति जिघ्रति रसयति चैव स्पृशति सर्वमात्मा जानीतेति यत्राद्वैतीभूतं वि
ज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यं किं तद्वाच्यं ॥ ७ ॥ एष
साधरः हि खल्वात्मेशानः शंभुर्भवो रुद्रः प्रजापतिर्विश्वसृक् हिरण्यगर्भः सत्यं प्राणो हंसः शास्ता विष्णुर्नारा
यणोऽर्कः सविता धाता विधाता सम्राडिंद्र इंदुरिति य एष तपत्यग्निरिवाग्निना पिहितः सहस्राक्षेण हिर
ण्मयेनांडेनैष वा विजिज्ञासितव्योऽन्वेष्टव्यः सर्वभूतेभ्योऽभयं दत्त्वारण्यं गत्वाथ बहिः सत्वेंद्रियार्थान्स्वाच्छ

चालयंते ८
निरस्यति
आनातिर काध्यप
जीवेश्व गर्भ
रूपोऽत्रे द्वारद्वि
ति

श्री
९

२ हिरण्मयमंडेनअनेक
छिद्रवता महताज्वालाजे
हितेनाग्निनाग्निर्दीपोमंद
पिहितःप्रांर्जनोनपर्वाद

२ उपासकस्यप्राणनेकर्त्तव्यंप्रदिशति ८

शरीरादुपसृज्येतेनमिति।विश्वरूपंहरिणंजातवेदसंपरायणंज्योतिरेकंतपंतं।सहस्ररश्मिःशतधा
वर्त्तमानःप्राणःप्रजानामुदयत्येषसूर्यः।८।तस्मा... नयान्नमेव८ विदित्वामनेवाग्निध्यायत्यात्म
नेयच्छतीतिध्यानंप्रयोगस्थंमनोविघ्नंश्रुतंमनःपूतिमुच्छिष्टापहतमित्यनेनतत्पावयेत्।उच्छि
ष्टोपहतं८ यच्चपापंदत्तंमृतसूतकाद्वावसोःपवित्रमग्निःसवितुश्चरश्मयःपुनंतुचन्नंममदुःस्त
तंचयदन्नपतु।अद्भिःपुरस्तात्परिदधातिप्राणायस्वाहाअपानायस्वाहाव्यानायस्वाहासमानायस्वा
होदानायस्वाहेतिपंचनिरग्निर्जुहोत्यथावशिष्टं८ यतवागश्नात्यथाद्भिर्भूयएवोपरिष्टात्परिद
धात्याचांतोभूत्वात्मयोनिःप्राणाग्निर्विश्वोसीतिचद्वाभ्यामात्मानमभिध्यायेत्।प्राणाग्निःपर
मात्मावैपंचवायुःसमाश्रितः।सप्रीतःप्रीणातुविश्वं८ विश्वभुक्।विश्वोसिवैश्वानरोसिविश्वंत्व
याधार्यतेजायमानं।विशंतुत्वामाहुतयश्चसर्वाःप्रजास्तत्रयत्रविश्वामृतोसीत्येवंविधिना

देवस्व

मंत्रा-स्मृति

३३ नृत्यात्मा ह्यन्नमस्य कर्मप्रधानस्तस्मात्त्रिगुणं तो ऽसंभोक्ता ॥ २ असति पि छ्ये स्थित सत्ता स्फूर्ति प्रदत्वेन चेतनः

खल्वनेनात्तानत्वं पुनरूपेति ॥ ८ ॥ अथापरं वेदितव्यमुत्तरेऽपि कार्य्येस्यात्मयज्ञस्य
यथा त्वमजादश्चैत्यस्योपव्याख्यानं पुरुषश्चैतात्प्रधानांतस्थः स एव भोक्तौ ज्ञात्तमन्
नुक्ता इति तस्यायं क्ता पुरुषांतस्थो त्रद्वैतं नामगत्यय यं यस्माद्बीजसंभवाहि पश
वस्तस्माद्बीजं भोज्यमनेनैव प्रधानस्य भोज्यत्वं व्याख्यातं तस्माद्भोक्ता पुरुषो भो
ज्या प्रकृतिस्तत्स्थो भुंक्ता इति प्राक्तत म[illegible]त्त्रिगुणात्मेद परिणामत्वान्महदाद्यं
विशेषांत लिंगमनेनैव चतुर्दशविधस्य मार्गस्य व्याख्यातो भवति सुखदुःख
मोहसंज्ञं [illegible] प्रपञ्चभूतमिदं जगत् ॥ नहि बीजस्य स्वादुपरिग्रहोऽस्तीति यावत्प्र
सूतिः ॥ तस्याप्येवं तिसृष्ववस्थास्वन्यत्वं प्रति वैकौमारं यौवनं जरा परिणामत्वात्
दैन्यमेवं प्रधानस्य व्यक्तो गतस्योपजं बुद्धिर्भवति तत्र बुद्ध्यादीनि स्वादूनिमवं

माया

पुद्बोधेषु मायानवादिती

हिरण्यगर्भादि अन्मशरीरपर्यंतं

माया

श्री
१०

मो ३

ना
सध्यव सायसं कल्पानिमाइस र्पेद्रिया धनि पेवस्याउ निमवंस्लेव ॰ सवीर्णाद्रिय
कमर्ति प्राराकर्मा एवं व्यक्त मन्नमस्य क्त मन्न मस्य निर्गुणाम्नो क्ता नोरू त्वाद्वैव
तन्यंप्रसिद्धं तस्य यथाग्निर्वैदेवानामन्नादः सोऽन्नमग्निर्नैवान्नमित्येव ॰ विसोम
संज्ञो येन्द्रू तास्माग्निसंज्ञो प्यव्यक्तमुखा इति वचनात् पुरुषोऽप्यव्यक्तमुखेन त्रिगु
णान्भुङ्क्ता इति यो हैव ॰ वेद संन्यासी योगी वात्मयाजी वे यथ यद्दूना कश्चित् स्त्रन्या
गारे कामिन्यः प्रविष्टास्य स्पृशंती द्रियार्थक्ति द्द योनं स्पृशति प्रविष्टान् संन्यासी योगी
वात्मयाजी वेति ॥१०॥ पर ॰ वा एतद्वात्मनोरूपं ॰ यदन्नमन्नमयो ह्ययं प्राणो
पनयघ्राणत्वमंता श्रोता ५ र एव वक्ता घ्राता भवति श्रोता भवति स्प्रष्टा भवति वक्ता
भवति रसयिता भवति घ्राता भवति द्रष्टा भवतीत्येव ॰ ह्याह ॥ अन्नादेप जाः प्रजायंते
स्प्रष्टा २ रसयिता भवति प्राणा ॰ श्रोत्र स्वजनीलेवः त्यां हयपयदिपस्वक्ता तिप्राणा सम्
द्व । मूत्वामंता

मनुष्यन्नादेपि । सोऽवित्तं । वस्तुतः जन्यादि स्था

चिरिसिद्धो

मनुरागेण

या काश्चित् पृथिवीं श्रिताः । अतो ऽन्नेनैव जीवंत्यथैनदपियंत्यंततः । अथान्यत्राप्युक्तं ॥ सर्वाणि
ह वा इमानि भूतान्यहरहः प्रपतंत्यन्नमभि जिघृक्षमाणानि सूर्यो रश्मिभिराददात्यन्नं तेनासौ तप
त्यन्नेनाभिषिक्ताः पचंतीमे प्राणाः अग्निर्वा अन्नेनोज्ज्वलत्यन्नकामेनेदं प्रकल्पितं ब्रह्मणा । अतोऽन्नमात्मे
त्युपासीतेत्येवं ह्याह । अन्नाद्भूतानि जायंते जातान्यन्नेन वर्द्धंते । अद्यतेत्ति च भूतानि तस्मादन्नं तदु
च्यते ॥१२॥ अथान्यत्राप्युक्तं ॥ विश्वभृद्वै नामैषा तनूर्भगवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य
रसो मनः प्राणस्य विज्ञानं मनस आनंदं च विज्ञानस्येत्यन्नवान्प्राणवान्मनस्वान्विज्ञा
नवानानंदवांश्च भवति यो हैवं वेद यावंतीह वै भूतान्यन्नमदंति तावदंतःस्थोऽन्नमत्ति यो ऽन्नमत्ति य	श्री
एवं वेद । अन्नमेव विजरन्नमन्नं च संवननं स्मृतं । अन्नं पशूनां प्राणोऽन्नं ज्येष्ठमन्नं भिषक्
स्मृतं ॥१३॥ अथान्यत्राप्युक्तं ॥ अन्नं वा अस्य सर्वस्य योनिः कालश्चान्नस्य सूर्यो योनिः कालस्य	११

तस्यैतद्रूपं यन्निमेषादिकालात्संभूतं द्वादशात्मकं वत्सरमेतस्याग्नेयमर्द्धमर्द्धं वारुणं मघाद्यं श्रविष्ठा
र्द्धमाग्नेयं क्रमेणोत्क्रमेण सार्पाद्यं श्रविष्ठार्द्धांतं सौम्यं तत्रैकैकमात्मनो नवांशकं सचारकविधं
सौक्ष्म्यत्वादेतत्प्रमाणमनेनैव प्रमीयते हि कालो न विना प्रमाणेन प्रमेयस्योपलब्धिः प्रमेयोपि
प्रमाणतां पृथक्त्वादुपैत्यात्मसंबोधनार्थमित्येवं ह्याह । यावत्यो वै कालस्य कलास्तावतीषु चरत्य सूर्यः
सौ यः कालं ब्रह्मेत्युपासीत कालस्तस्यातिदूरमपसरतीत्येवं ह्याह । कालात्स्रवंति भूतानि
कालाद्वृद्धिं प्रयांति च । काले चास्तं नियच्छंति कालो मूर्तिरमूर्तिमान् ॥१४॥ द्वे वाव ब्रह्मणो रूपे का
लश्चाकालश्चाथ यः प्रागादित्यात्सोऽकालोऽकलोथ य आदित्याद्यः स कालः सकलः सकलस्य वा
एतद्रूपं यत्संवत्सरः संवत्सरात्खल्वेमा वै प्रजाः प्रजायंते संवत्सरेणेह वै जाता विवर्द्धंते सं
वत्सरे प्रत्यस्तं यंति तस्मात्संवत्सरो वै प्रजापतिः कालोन्नं ब्रह्मनीडमात्मा चेत्येवं ह्याह । कालः पचति
भूतानि सर्वाण्येव महात्मनि । यस्मिंस्तु पच्यते कालो यस्तं वेद स वेदवित् ॥१५॥ विग्रहवानेष कालः सिं
सरारवान्

मंडलस्थः

धुराजः प्रजानां। एषतत् स्रष्टः सविताख्यायस्मादेवेमेचेदंस रा संबहुसंवत्सरादयः। सूयंते यैस्यः सर्व

मिदम् अत्रायत् किंचित् शुभाशुभं दृश्यते इह लोके तदेतेभ्यस्तस्मादादित्यात्मा ब्रह्मकालसंज्ञमादि

त्यमुपासीतादित्यो ब्रह्मेत्येके एवं ह्याह। होता भोक्ता हविर्मंत्रो यज्ञो विष्णुः प्रजापतिः। सर्वः कश्चित्

प्रभुः साक्षी योमुष्मिन् भाति मंडले। १६। ब्रह्म ह वा इदमग्र आसीदेकोनंतः प्रागनंतो दक्षिणतोनंतः प्र

तीच्यनंत उदीच्यनंत ऊर्ध्वं चावाङ् च सर्वतोनंतो न ह्यस्य प्राच्यादि दिशः कल्पंतेथ तिर्यग्वावाङ् चोर्ध्वं वा

नूह्य एष परमात्मा परिमितोजोतर्क्योचिंत्य एष आकाशात्मैवैष कृत्स्नक्षय एको जागर्तीत्येतस्मादाका

शादेष खल्विदं चेतामात्रं बोधयत्यनेनैव चेदं ध्यायतेस्मिंश्च प्रत्यस्तं यात्यस्यैतद्भास्वरं रूपं यद

मुष्मिन्नादित्ये तपत्यग्नौ चाधूमके यज्ज्योतिश्चित्रतरमुदरस्थोथवा यः पचत्यन्नमित्येवं ह्याह।

यश्चैषोग्नौ यश्चायं हृदये यश्चासावादित्ये स एष एक इत्येकस्य हैकत्वमेति य एवं वेद। १७। तथा त

ज्ञानसंस्काः त्प्रयोगकल्पः प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडंगा इत्युच्यते योगोनेन यदा पश्य

श्री

१२



तद्वा

नुपश्यति स कावव वर्ष्मैकत्र हरिमीशं पुरुषं बलं यो नि विद्यानुत्तप पापं विहाय परव्ययं सर्वमेकीक
रोतित्येव ८ ह्याह । यथा पूर्वतमादीप्तं नाश्रयंति मृगा द्विजाः । तद्वद्ब्रह्मविदो दोषा नाश्रयंति कदाचन
१८ । अथान्यत्राप्युक्तम् ॥ यदा वै बहिर्विद्वान्मनो नियम्येंद्रियार्थांश्च प्राणो निवेशयित्वा निःसंकल्प
स्ततस्तिष्ठेदप्राणादिह यस्मात्संभूतः प्राणसंज्ञको जीव तस्मात्प्राणो वै तुर्याख्ये धारयेत्प्राणमि
त्येव ८ ह्याह । अचित्तं चित्तमध्यस्थमचिंत्यं गुह्यमुत्तमं । तत्र चित्तं निधायेत तच्च लिंगं निराश्रयं
१९ । अथान्यत्राप्युक्तम् अतः परास्य धारणा तालुरसनाग्रनिपीडनाद्वाङ्मनःप्राणनिरोधनात्
ब्रह्म तर्केण पश्यति यदात्मनात्मानमणोरणीयांसं द्योतमानं मनःक्षयात्पश्यति तदात्मनात्मा
नं दृष्ट्वा निरात्मा भवति निरात्मकत्वादसंख्यो योनिश्चिंत्यो मोक्षलक्षणमित्येतत्परं रहस्यमिति
वं ८ ह्याह । चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभं । प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नु
त इति । २० । अथान्यत्राप्युक्तम् ऊर्ध्वगा नाडी सुषुम्नाख्या प्राणसंचारिणी तालुरंतर्विच्छिन्ना

तयाप्राणोंकारमनोत्पुक्रम्योर्ध्वमुत्क्रमेणाध्यं त्वचधर्मयं परिवर्त्यवेदिं प्याशसंयोग्यमहिमामहि
नंनिरीक्ष्य ततो निरात्मक त्वमेति निरात्मकत्वान्तसुखदुःखभागन्नवतिकेव
लत्वं लभ्रताइत्येव ८ ह्याह॥ परः पूर्वं प्रति प्राप्य निगृहितानिलं ततः ।तीत्वापार
मपारे तापश्यात्युंजीत मूर्द्धनि॥२१॥ अथान्यत्र प्यक्तं देवावब्रह्मणी अभिध्ये
ये शब्दश्चाशब्द यश्च शब्देनैवाशब्द माविःक्रियते अथ तत्राउं मित्ति शब्देनेनोर्ध्व
मुत्क्रान्तो शब्दे निधनमेत्यथाहैषा गतिरेतदमृतमेतत्सा योज्यत्वं तथा वेत्यथ
यथोर्णनाभिस्तंतुनोर्ध्वमुत्क्रान्तो वकाशं लभतीत्येवं वा खल्वासा व अभिध्याता
उंमित्यनेनोर्ध्वमुत्क्रान्तः स्वातंत्र्यं लभते न्यथापरे शब्दवादिनः श्रवणांगुष्ठयोगेन

श्री
१२

तर्हि दयाकाशशाब्दमाकरायितिसप्तविधेयंतस्योपमा यथा नयं किंकिणीकां
स्यवक्र कत्रेकवि: तं धिकावृष्टिर्निवातेवदातीति तं प प्रकूलजरुलामती स्यप
रेशाद्वे व्यक्तेब्रह्मलव्यस्तं गतास्तत्र [illegible] मिलोपपकुविवेक्यायथाप
नामधुत्वं नानारसाइसेवेद्याहाद्विब्रह्मलरावेदितव्ये शाब्दब्रह्मपरं वयत्॥
शाब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥२२॥ अथान्यत्राप्युक्त ध यः श
ब्दस्तदोऽमिस्येदे तेद्दरं पदस्याग्रं तमु शांतमशब्दमभयमशोकमानंदं त
प्तं स्थिरमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञितं सर्वपरत्वायतदेताउपासीतेत्येवं ह्या श्री
द। योसौ परापरो देवो ओंकारो नाम नामतः। निःशब्दः शून्यभूतस्तु मूर्ध्नि स्थानेततोऽन्यसेत्॥२३॥ अ २४

मू २

थान्यत्राप्युक्तं धनुः शरीरमोमित्येतत् शरः शिखास्य मनस्तमोलक्षणं भित्वा तमोऽतमावि
ष्टमागच्छत्पप्याविष्टं। भित्त्वालातचक्रमिव स्फुरंतमादित्यवर्णमूर्जस्वंतं ब्रह्म तमसः परमपश्य
त् यदमुष्मिन्नादित्ये यः सोमेऽग्नौ विद्युति विभाति मथ खल्वेनं दृष्ट्वामृतत्वं गच्छतीत्येवं ह्याह। ध्या
नमंतःपरे तत्त्वे लक्ष्येषु च निधीयते। अतो विशेषविज्ञानं विशेषमुपगच्छति। मानसे च विली
ने तु यत्सुखं चात्मसाक्षिकं। तद्ब्रह्म चामृतं शुक्रं सा गतिर्लोक एव सः।२४। अथान्यत्राप्यु
क्तं। निद्रैवान्तर्हितेंद्रियः शुद्धितमस्वप्नाधियास्य गर्त्तवपः पश्यती इंद्रियबिलेवि विश्वप्रणवाख्यं
प्रवर्त्तिता रं प्रणेतारं भारूपं विगतनिद्रं विरजं विमृत्युं विशोकं च सोऽपि प्रणवाख्यः प्रणेता भारूपो
विगतनिद्रो विजरो विमृत्युर्विशोकोऽभवतीत्येवं ह्याह। एवं प्राणमथोंकारं यस्मात्सर्वमने
कधा। युनक्ति युंजते वापि तस्माद्योग इति स्मृतः। एकत्वं प्राणमनसोरिंद्रियाणां तथै

जीवब्रह्मैक्य योगः

नोउ १

वचा। सर्वजीवपरित्यागो योगस्य सन्निधीयते ॥२५॥ अथान्यगात्पुष्कलं पथा वा अस्तुचारिणः शा

कुनिकः मूत्रये येनोद्धृत्य दरे ग्नौ जुहोत्येवं ॥ वा [illegible] ः स्वच्चेमानू प्राणा

परमा आत्म

नो भित्पनेनो हूत्वा नामये ग्नौ जुहोत्यतस्तत्तो विवसोथ यथा तथा विंयसर्पिस्तृणकाष्ठ स

स्पर्शेनोज्वलतीत्येवं ॥ वा परवच्चक्षा च घ्राणारव्य प्राणासं ॥ स्पर्शेनोज्वलतीत्येवं प्रबुद्ध

स्ये तनू ब्रह्मणो रूपं चैतन्द्विक्षोः परमंपदं चैतन्नु रुत स्पदन्दत्वमेतत्तु दपरिमितधा

मात्मानं विश्वस्य पूरयती मां त्रैलोक्यानिस्येनं ॥ वह्रा वङ्केश्वयदतत् स्वतुविस्फुलिंगास्

र्यान्मयूखाश्च तथैव तस्य। प्राणादयो वैधुनरेव तस्मादुत्स्फुरंतीह यथाक्रमेण ॥२६॥ श्री

अथान्यगात्पुष्कलं प्रज्वलतो यावैतन्नेडः परस्य भूतस्य शरीरस्य प्रशरीरस्योष्मस ७५

स्येन तनू घ्नं तमसा विः स्वल्लासि निहितं चैतदेकायेतो व मंत हृदयाकाश विंदुं

पापं हृदाकाशे

तियत्तस्य ज्योतिरिव संपद्यतीत्येतत्तजावम वि देतौलिन्न मावयस्मिंश्च निहितं यथा विरेतौ तिनृमि
त्वं मृद्वत्तुसंस्थमयास्मिंश्च यथाग्म पस्कारद्वयोनानित्तिवंदति प्रनश्यति चित्तंतथाश्रयेणासहैवंमित्वे
च ॥ ह्रा ह्रा हृद्याकाशमयं कोशमानंदपरमालयं यो ऽस्वं योगश्चनतो ऽस्माकं तेजश्चैवाग्निसूर्ययो:
२७ अथान्यत्राप्युक्तं निरुत्तेंद्रियार्थान्निक्रम्यततप्रवृत्त्या ... ज्यं धातिर्दंडं धनुर्द्धृहील्वानभि
मानमयेन चैवेषुणा तं ब्रह्मद्वारपालं निहत्याद्यः संमोहमौली तृष्णेर्ष्याकुंडली तंद्रीराघवेत्र
भिमानाध्यक्षः क्रोधस्वप्नलोभदंडं धनुर्गृहीत्वेच्छामयेन चैवेषुणेमानिरवहितानि हंति
तं हत्वोंकारप्लवेनांतर्हृदयाकाशस्य पारं तीर्त्वा ऽविर्भूत्वो नराकारोशानकैरवटे वावट
इव धातुकामः संविशत्येवं ब्रह्मशालां विशेत्ततश्चतुर्जालं ब्रह्मकोशं प्रणुदेद्गुरुवागमनेत्यतः
शुद्धः पूतः शून्यः शांतो ऽप्राणो निरात्मानंतो ऽक्षय्यः स्थिरः शाश्वतो ऽजः स्वतंत्रः स्वे महिम्नि तिष्ठ

संन्यासेष्व देहाभिमान ... का

अभावस्याभि मा

अनिदेत २ उपानिषत्

स्मा
त्पतः स्वमहिम्नि तिष्ठमानं दृष्ट्वा चक्रमिवसंसारचक्रमालोकयतीत्येवं ह्याह ।षा
ड्भिर्मासैस्तुयुक्तस्य नित्ययुक्तस्य देहिनः । अनंतः परमो गुह्यः सम्यग् योगः प्रवर्तते । रजस्त
मोभ्यां विद्धस्य सुसमिद्धस्य देहिनः । पुत्रदारकुटुंबेषु सक्तस्य न कदाचन ॥२८॥ एवमु
संतुष्टा क्त्वांतर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वा चानया ब्रह्मविद्यया राजन् ब्रह्मणः पंथान
मारूढाः पुत्राः प्रजापतेरिति संतोषं द्वंद्वतितिक्षां शांतत्वं योगाभ्यासादवाप्नोतीत्ये
तद्गुह्यतमं नापुत्राय नाशिष्याय नाशांताय कीर्तयेदित्यनन्यभक्ताय सर्वगुणसंपन्ना
य दद्यादिति ॥२९॥ ॐ शुचौ देशे शुचिः सत्वस्थः सदधीयानः सद्वादी सद्ध्यायी सद्य्या
जी स्यादित्यतः सद्ब्रह्मणि सत्याभिलाषिणि निर्वृत्तोन्यस्तत्फलछिन्नपाशो निराशः परेष्वा श्री
त्मवद्विगतभयो निःकामोक्षय्यमपरिमितं सुखमाक्रम्य तिष्ठति परमं वै शेवधेरि १६

जीवस्य

वपरस्योद्धरणायेन्निकामसत्वं सहि सर्वकामसमयः पुरुषोध्यवसायसंकल्पो भिमानिनि

गोबद्धोतत्तद्विपरीतोमुक्तोत्रैकआकुत्तुताः प्रसतिन्नेदृश्यता इत्यध्यवसायात्मकंधमुपाग

तोध्यवसायस्यदोषक्षयाद्विमोक्षोमनसाह्येवपश्यतिमनसाशृणोतिकामः संकल्पो

विचिकित्साश्रद्धाश्रद्धाधृतिरधृतिः।ह्रीर्धीर्भीरित्येतत्सर्वंमनएवगुणाधेकृद्धमानः क

वुरवीतत्तश्रास्त्रिप्येवलोलुप्यमानः सस्पृहोव्ययस्त्रवानिमानेवंप्रयाता इत्यहंसोममे

त्येवंमन्यमानोनिबध्नात्यात्मनात्मानंजालेनेवखचरोतः पुरुषोध्यवसायसंकल्पा

भिमानलिंगोबद्धोतत्तद्विपरीतोमुक्तस्तस्मान्निरध्यवसायोनिः संकल्पोनिरभिमान

स्तिष्ठेदेतन्मोक्षलक्षणमेषात्रब्रह्मपदव्येषोत्रद्वारविवरोनेनास्यतमसः पारगमि

ष्यत्यत्रहिसर्वेकामाःसमाहिता इत्यत्रोदाहरंति।यदापंचावतिष्ठंतेज्ञानानिमनसासह

वात्स्यायन

ह।बुद्धिश्चनविचेष्टतेतमाहुःपरमांगतिमित्येतदुक्त्वांतर्हृदयःशाकायन्यस्तस्मैनमस्कृ
त्वायथावदुपचारीसन्नतस्पेमरुदुत्तरायणंगतोनह्यत्रोद्वर्त्मनागतिरेषात्रब्रह्मपथः
सौरंद्वारंभित्वोर्ध्वेनविनिर्गताइत्यत्रोदाहरंति।अनंतारश्मयस्तस्यदीपवद्यःस्थितोहृदि
सितासिताःकद्रुनीलाःकपिलामृदुलोहिताःऊर्ध्वमेकःस्थितस्तेषांयोभित्वासूर्यमंडलंब्र
ह्मलोकमतिक्रम्यतेनयांतिपरांगतिं।यदस्यान्यद्रश्मिशतमूर्ध्वमेवावस्थितं।तेनदेवनिकायांनि
नांस्वधामानिप्रपद्यते।येनैकरूपाश्चाधस्ताद्रश्मयोस्यमृदुप्रभाः।इहकर्मोपभोगाय
तैःसंसरतिसोवशः।तस्मात्सर्गस्वर्गापवर्गहेतुर्भगवानसावादित्यइति।३०।किमात्मका
निवाएतानींद्रियाणिप्रचरंत्युद्गंताचैतेषामिहकोनियंताचेत्याह।आत्मात्मकानी श्री
त्यात्माह्येषामुद्गंतानियंतावाप्सरसोभानवीयाश्चमरीचयोनामाथपंचभिरश्मिभिर्विष ७

२ उत्साहिः
१ विषयाः

ज्ञानेन्द्रियैरिति

यानत्रीतिकतमआत्मेतियोयंशुद्धः पूतः शून्यः शांतादिलक्षणोक्तः स्वकैर्लिंगैरुपगृह्यस्तस्यै
तल्लिंगमलिंगस्याग्नेर्यदौष्ण्यमाविष्टंचापांयः शिवतमोरसइत्येकेथवाक्श्रोत्रंचक्षु
र्मनः प्राणइत्येकेबुद्धिर्धृतिस्मृतिः प्रज्ञानमित्येकेतेवाएतस्यैवंयथैवेहबीजस्यांकुरा
वाथधूमार्चिर्विस्फुलिंगाइवाग्नेश्चेत्यत्रोदाहरंति। वह्नेर्यद्वत्खलुविस्फुलिंगाः सूर्यान्म
याखाश्चतथैवतस्यप्राणादयोवैपुनरेवतस्मादभ्युच्चरंतीहयथाक्रमेण। ३१। तस्माद्वाए
तस्मादात्मनीसर्वेप्राणाः सर्वेलोकाः सर्वेवेदाः सर्वेदेवाः सर्वाणिचभूतान्युच्चरंतितस्योपनिष
त्सत्यस्यसत्यमितियथार्द्रैधाग्नेरभ्याहितस्यपृथग्धूमानिश्चरंत्येवंवाएतस्यमहतोभूतस्य
निःश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोथर्वांगिरसाइतिहासः पुराणंविद्याउपनिषदःश्लो
काः सूत्राण्यनुव्याख्यानानिव्याख्यानान्यस्यैवैतानिविश्वाभूतानि। ३२। पंचेष्टकोवाएषोग्निर्य
संवत्सरस्तस्येमाइष्टकायोवसंतोग्रीष्मोवर्षाः शरद्धेमंतः। शिशिरः सशिरः पक्षसीपृष्ठपुष्

वानैषोग्निः पुरुषविद्ःसेयं प्रजापतेः प्रथमा चितिः करैर्यजमानमंतरिक्षमुत्क्षिप्य वायवे प्रायच्छत्
प्राणो वै वायुः प्राणोग्निः तस्येमा इष्टकायः प्राणो व्यानोपानः समानउदानः सा शिरःपक्षसीह
पुच्छवानैषोग्निः पुरुषविद्स्तदिदमंतरिक्षं प्रजापतेर्द्वितीया चितिः करैर्यजमानं दिवमुत्क्षि
प्यैंद्राय प्रायच्छदसौ वा आदित्य इंद्रः सैषाग्निस्तस्येमा इष्टकायद्दकृ यजुःसामाथर्वांगिरसा
इति [illegible] सशिरः पक्षसीह पुच्छवानैषोग्निः पुरुषविद्ः सैषा द्यौः प्रजापतेस्तृ
तीयाचितिः करैर्यजमानस्यात्मविद्वदानं करोत्पयात्मविदुत्क्षिप्य ब्रह्मणोपायच्छत्
तत्रानंदी आमोदी भवति ॥३३॥ पृथिवी गार्हपत्योंतरिक्षं दक्षिणाग्निर्द्यौराहवनीयस्तत एव श्री
पवमानः पावकः शुचिश्चाविः स्ततमेतेनास्य यज्ञे [illegible] तः पवमानः पावकः शुचिः १८
संघातो हि जाठरस्तस्मादग्निर्यष्टव्यः श्वेतवास्तेनाग्नौ निध्यातव्यो यजमानो हविर्गृहीत्वा॥

जलकाकजीव हंससूर्य उभयोस्तेजपुंज

त्वादेवताभिध्यानमिछति॥हिरण्यवर्णःशकुनोहृद्यादित्येप्रतिष्ठितः।मद्गुर्हंसस्तेजोवृषःसो
स्मिन्नग्नौयजामहइतिचापिमंत्रार्थंविचिनोति।तत्सवितुर्वरेण्यंभर्गोस्याभिध्येयंयो
बुद्ध्यंतस्थोध्यायीहमनःशांतिपदमनुसृत्यात्मन्येवधत्ते।अत्रेमेश्लोकाभवंति।यथानिरि
धनोवह्निःस्वयोनावुपशाम्यति।तथावृत्तिक्षयाच्चित्तंस्वयोनावुपशाम्यते।स्वयोनावुप
शांतस्यमनसःसत्यकामतः।इंद्रियार्थविमूढस्यानृताःकर्मवशानुगाः।चित्तमेवहिसंसारं
तत्प्रयत्नेनशोधयेत्।यच्चित्तस्तन्मयोभवतिगुह्यमेतत्सनातनं।चित्तस्यहिप्रसादेनहंतिक
र्मशुभाशुभं।प्रसन्नात्मात्मनिस्थित्वासुखमव्ययमश्नुते।समासक्तंयथाचित्तंजंतोर्विषयगो
चरे।यद्येवंब्रह्मणिस्यात्तत्कोनमुच्येतबंधनात्।मनोहिद्विविधंप्रोक्तंशुद्धंचाशुद्धमेवच।
अशुद्धंकामसंपर्कात्शुद्धंकामविवर्जितं।लयविक्षेपरहितंमनःकृत्वासुनिश्चलं।यदा
यात्यमनीभावंतदातत्परमंपदं।तावन्मनोनिरोद्धव्यंहृदियावत्क्षयंगतं।एतज्ज्ञानंच

रो

मोहांच शेषान्नेयं यथा विस्तराः॥ समाधीनिर्धौतमलस्य चेतसो निवेशितस्यात्मनि यत्सु
खं भवेत्। न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृह्यते॥ अपामापोग्निरग्नौ
वाव्योम्नि ज्यौ [illegible] मनलक्षयेत्। एवमंतर्गतं यस्य मनः स मुच्यते। मन एव मनु
ष्याणां [illegible] कारणं बंधमोक्षयोः॥ बंधाय विषयासंगि मोक्षो निर्विषयं स्मृ
तामिम [illegible] तो नाग्निहोत्रमनग्निविद्दान निध्यायिना। ब्रह्मणः पदव्योमा
नुस्मरणं विरुद्धं तस्मादग्निर्यष्टव्यश्चेतव्यो निध्यातव्यः॥३४॥ नमो ग्नये पृथिवीक्षि स्तोत्रयो
ते लोकस्मृते लोकमस्मै यजमानाय धेहि नमो वायवेंतरिक्षक्षिते लोकस्मृते लोकम
स्मै यजमानाय धेहि नम आदित्याय दिविक्षिते लोकस्मृते लोकमस्मै यजमानाय धे श्री
हि नमो ब्रह्मणे सर्वक्षिते सर्वस्मृते सर्वमस्मै यजमानाय धेहि। हिरण्मयेन पात्रे १६
सत्यस्यापिहितं मुखं [illegible] उरुष॰

त्तत्वंपूषन्नपावृणुसत्यधर्माय विष्णवे।योसा॥आदित्येपुरुषःसोसावहमित्येषद्वैसस्यध
र्मोयदादित्यस्यादित्यत्वंतच्छुक्लंपुरुषमलिंगंनभसोंतर्गतस्यतेजसोंशमात्रमेतत्यदादित्य
स्यमध्यस्थंवेत्यक्षिण्यग्नौचैतद्ब्रह्मैतदमृतमेतत् आदित्यस्यमध्येअमृतं यस्यहिसोमप्राणा
वाअप्यंकरा [illegible] ब्रह्मैतदमृतं [illegible] एतत्सत्यधर्मोनभसोंतर्गतस्यतेजसोंशमात्रमेतत्यदादि
त्यस्यमध्ये [illegible] दित्यमग्नौ वैतत्ब्रह्मैतदमृतमेत [illegible] सत्यधर्मोनभ
सोंतर्गतस्यतेजसोंशमात्रमेतत्यदादित्यस्यमध्ये [illegible] अमृतं यस्यहिसोमप्राणावा
ओं अप्यंकरा [illegible] एतत्ब्रह्मैतदमृतमेतद्भर्गएतत्सत्यधर्मोनभसोंतर्गतस्यतेजसों
शमात्रमेतत्यदादित्यस्यमध्येयजुर्दीप्यस्यापोज्योतीरसोमृतंब्रह्मभूर्भुवः
स्वरोमित्यष्टपादंशुचिंहंसंत्रिसूत्रमणुमव्ययंद्विवर्त्मानंतेजसेद्धंसर्वंपश्यं ६
न्पश्यतिनभसोंतर्गतस्यतेजसोंशमात्रमेतत्यदादित्यस्यमध्येउदुत्यामयूरवे

२ वेदत्रय   २ धर्माधर्मा [illegible]

श्री
२०

नवतएतत्...सँसधर्मएतद्यजुरेतच्चपएतदग्निरेतद्वायुरेतत्सामएतदापएतद्ब्रं
ह्माएतत्शुक्रमेतदमृतमेतद्ब्रह्मविषयमेतत्प्रानुरेविस्तस्मिंन्नेवयजमानस्मैं
थवइवव्रीयंतेएषाब्रेवैलोकतावहिसर्वेकामाःस्मातितारस्यत्रोदाहारंति॥अथश्रु
ष्ता.रयइवात्रुवातेरितेसशंस्फुरत्यसावंतर्गःस्फुरतोरो॥योहिवशंवित्तससवित्तसद्वेत
वित्तसेकथामेतस्यात्तदात्मकश्च॥यचेविंदवइवाप्सुचरंत्यजस्त्रंविद्युदिवाभ्राविषिःप
रमेव्यामन्यातेविंषोवेयशसभ्राश्रयवशाज्ञेयमिरूपाइवक्रस्तवर्त्मनि॥२५॥द्वेवाव
खल्वेतेब्रह्मज्योतिषोरूपकेशांतमेकंसमृद्धंवैकमथयजुःशांततस्माध्वरंखमप्यपर
समृद्धमिदंतस्मान्नंतस्मान्मंत्रेषुचान्यामिषपुरोऽशमस्थालीपाकादिभिर्यद्वाध्वमंतर्वेद्य
मास्यवर्द्धिषैरन्नपानैश्चास्यमाहवनीयमितिमत्वातेजः सःसमृद्धोऽपुण्यलोकविजि

श्री
२०

त्यर्थाया अमृतत्वाय चात्रोदाहरंत्यग्निहोत्रं जुहुयात् स्वर्गकामो यमराज्यमग्निहोत्रेणाभि
यजंति सोमराज्यसुत्येन सूर्यराज्यं चोशनास्वाराज्यमतिरात्रेण प्राजापत्यमासहस्र
संवत्सरसत्रेणेति ॥ वत्सर्याधारं त्विह योगाय यथादीपस्य संस्थितिः ॥ अंतर्यजोपयोगादि
[illegible] मौ स्थिता वासस्त्रुवीतथा ॥ २६ ॥ तत्समासमित्यनेनैतदुपासीत परिमितं तं जस्तत्रिधाग्निर्हि तम
ग्ना आदित्ये प्राणेष्वेषा नान्यन्न बहुमित्येषाम्नौ हुतमादित्यं गमयत्यतो यो रसोऽस्त्र वतत्स उद्गीथः
वर्षति तेनेमे प्राणा प्राणेभ्यः प्रजा इत्यत्रोदाहरंतियद्वि रश्मिनो रूपते तदादित्यं गमयति तस्य
ये रश्मिभिर्निर्वर्षीति तेनान्नं भवत्यन्नाद्भूतानामुत्पत्तिरित्येषच [illegible] स्वाहा ॥ अग्नौ प्रास्ताहुतिः स
म्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥ २७ ॥ अग्निहोत्रं जुहुयान्नो लोम
जो संभिन्नत्यतः संमोहं छित्वा नको धा [illegible] स्नुत्वानः काममभि [illegible] पमानस्तत्रानुजातं ब्रह्मलको

२१ शांभिंद तः परमाकाशमत्रहि सौरसोम्याग्नेय सात्विकानिमंडलानि निभित्त्वा ततः शुद्धंसत्वां
तरस्थमचलममृतमच्युतंध्रुवं विष्णुसंज्ञितंसर्वापरंधामसत्यकामसर्वज्ञत्वसंयुक्तं
स्वतंत्रंचैतन्यंस्वेमहिम्नीतिष्ठमानंपश्यत्यत्रोदाहरंति॥ रविमध्येस्थितःसोमःसोममध्ये
हुताशनः॥ तेजोमध्येस्थितंसत्वंसत्वमध्येस्थितोच्युतः॥ शारीरप्रादेशांगुष्ठमात्रम
णोरप्यण्वंध्यात्वातः परमतांगच्छत्यत्रहिसर्वेकामाःसमाहिताइत्यत्रोदाहरंति॥ अंगु
ष्ठप्रादेशशरीरमात्रंप्रदीपप्रतापवत्द्विस्त्रिधाहि॥ तद्ब्रह्माभिष्टूयमानंमहोदेवोभु
वनान्याविवेशॐनमोब्रह्मणेनमः॥३८॥ षष्ठःप्रपाठकः॥ अग्निर्गायत्रंत्रिवृद्रथंतरंवसंतःप्रा त्रै
णोनक्षत्राणिवसवपुरस्तादुद्यंतितपंतिवर्षंतिस्तुवंतिपुनर्विशंत्यंतर्विवरेणेक्षंत्यचिं श्री
त्योमूर्तोगभीरोगुप्तोनद्यो घनोगहनोनिर्गुणःशुद्धोभास्वरोगुणभुग्भयोनिर्वृत्तियो २१
गंभीरो

जीश्वरः सर्वज्ञो महाप्रभुर्योनाद्यंतः श्रीमान् योधीमान निर्देश्यः सर्वस्य कुस्तवस्यामा सर्वदं
ङ्कुः सर्वेशानः सर्वस्यांतरांतर इति ॥ ॥ उं त्रिष्टुप् पंचदशोक्षरः द्वीप्मो ये
न सोमो रुद्रादहितत उद्यंति तपंति वर्षंति स्तुवंति पुनर्विशंत्यंते विवरे लोहूं सनाद्यंतो प
रिमितो परिच्छिन्नो परप्रयोज्य स्वतंत्रो लेंगो महत्तोनंत शक्तिरिति ॥ मा स्वर इति ॥ ५ ॥ म
रुतो जगती सप्तदशोक्षरूप ६ं वर्षत्रिरूपा नः श्रु-रु आदि सोः पश्चाद् उद्यंति तपंति वर्षंति
स्तुवंति पुनर्विशंत्यंते विवरे लो हंति त स्वरशांत महाशब्द ममपममशो क मानं देशस्मन् ६ं स्थिर
मचलममतमच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापिरं धाममेति ॥ ३ ॥ विश्वेदेवा अनुष्टुबेकविंशो
वैराजः शारद समानो वरुणा साध्यसउत्तरतउद्यं तिंतपंति वर्षंति स्तुवंति पुनर्विशं
त्यंते विवरे तोहं सततः शुद्ध पूतः शून्यः शांतो प्राणो निरात्मानंत इति ॥ ॥ मित्रावरुणौ

२२ पंक्तिस्त्रिंशवत्रपरिस्त्रिंऽशौशाकरैवतेहेमंतशिशिराउदानोंगिरसश्चंद्रमाऊर्द्धउचिंयं
ति तपंतिवर्षंति स्तुवंति पुनर्विशंयंतविवेरेते हंतिमरा व्याख्यं प्रते तारंत्राफं
पऽविगतनिंद्रऽविजरऽविमृत्युऽविशोकमिति॥प॥शनिराहुकेतुरगरक्षो
यहूनरविहमस रत्नेमाहृद्योधस्ताद्धंति तपंति वर्षंति स्तुवंति पुनर्विशंयंत
विवेरेते हंति यः प्रज्ञोविधरराः स्रवंतिरोहरःश्रुद्धः पूतोनांतः हृोतः शांतद्वृति
ति॥६॥एषहिखल्वात्मांतर्हृदयेणीयाद्वौनिर्मिरिव विश्वरूपोस्यैवान्नमिदं
सर्वमस्मिन्नोताइमाःप्रजाएषतआत्मापहतपाप्माविजरोविमृत्युर्विशोको श्री
विविकित्सोविपाशःसत्यसंकल्पःसत्यकामएषपरमेश्वरएषभूताधिप २२

तिरेषमृतपालरएष सेतुर्विधरताएष हि खल्वात्मेशानः शंभुर्भवोरुद्रः

प्रजापतिर्विश्वसृक् हिरण्यगर्भः सत्यंप्राणोहंसः शास्ताच्युतोविष्णुर्नारायणो

यश्चैषाग्नौ यश्चायंहृदये यश्चासावादित्ये स एष एकस्तस्मै ते विश्वरूपा

य सत्येनमहिम्ने तायनमः॥७॥ आपदानीतोनोपसर्गाराजनुमोहजोल

स्येषवैयो।नियंदिक्ष्वग्यैः स्वहस्वगस्यैषवाद्यैपुरस्ता[illegible]दु ते [illegible] धसं केनाभि

ष्वं स धपेवान्येहनि सप्रमुदि तानि सप्रवासितानि स्वयावनको येनीर्गि

ण्योपजीविनोथयेवान्येह पुरपा जाकनपा जयाजनको [illegible] रिष्याः [illegible]

शास्त्रविद्वासोथयेवान्येह वाह्नज टनरप्तद्प्रवजित रंगावतारियोराजकर्म

संग:
स्वर्गाहिस्व
ऐहिकलोके

तानवारतं

द्वितां

परदीपा

पिङ्गला

पियतमनसास

श्री नै क्रि

२३ लिंपतितादयोपयेचान्येहयच्चरादसमंततगलापिधा चो [illegible] रागस्व
हादीनामर्थंपुरस्कृत्य शामयामइसुवंध्य वालाधचौये न्येहहवधाकपा
यकुंडलिनःकापालिनोपि ये चान्ये दृष्टांतकेदृष्टांतकुहके ऽज्ञानैर्वैदिके
ष्वपरिंदुमिच्छंति तेःसहनसंवसेत्तथा श्यमूतावितेतस्कराअस्वर्याइसवत्
स्याह।।नैरात्मवादकुहकैर्मिथ्यादृष्टांतहेतुभिः ।। भ्राम्यंलोकोनजानातिवेद
विद्यांतरंतुयत्।।८।।बृहस्पतिर्वैशुक्रोभूत्वेंद्रस्यायायास्वरेभ्यः।।इमायै
मामनिघामसृजन्नमाशिवमभ्रशिवमितिस्कदिश्यं त्वशिवंशिवमितिवेदादि श्री
शास्त्रहिंसकधर्मान्निधनमस्त्विति वदंस्ततो नैनामप्रतिधीयेतान्यथेषा २३

उपरि स्था

या

वध्येवेषारस्तिमात्रं फलमस्या रत्तस्कृतस्येवनारंभणीयेस्येवं ह्याह ॥ दूरमेतेवि
परीते विषूची अविद्या च विद्येति ज्ञाता ॥ विद्याभीप्सितं नचिकेतसं मन्ये न
त्वा कामा बहवो लोलुपंते ॥ विद्यां चाविद्यां च यस्तद्वेदोभयं सह ॥ अविद्यया मृत्युं
तीर्त्वा विद्ययामृतमश्नुते ॥ अविद्यायामंतरे वेष्ट्यमानाः स्वयं धीराः पंडितंमन्यमा
नाः दंद्रम्यमाणाः परियंति मूढा अंधेनैव नीयमाना यथांधा इति ॥ देवासुरा ह वै
य आत्मकामाः ब्रह्मणोंतिकं प्रययाः तास्मै नमस्कृत्वोचुर्भगवन् वयमात्मकामाः स त्वं नो ब्रूहि
स ततश्चिरं ध्यात्वा मन्यतान्यतात्मानो वै तेस्मराः अतोन्यतममेतेषामुक्तं तदिमे मूढा उ
पजीवंत्यजिंबां गिरा सत्यमिथ्यापतिनोऽन्नतानि शंससि नः सत्यमिवानृतं पश्यंतीद्रजालव
दित्यतो यद्वेदेष्वभिहितं तत्सत्यं यद्वेदेषूक्तं तद्विद्वांस उपजीवंति तस्मात् ब्राह्मणो ना

२ वेदशास्त्रं तदि

वैदविद्यां विना नाशस्यादिति
२ओहे

२४ वैदिकमधीयेतायमर्थस्यादिति॥१०॥एतद्वावतत्स्वरूपंनभसःखंवैतन्नं तस्ययत्परंतेजस्तत्रे
ध्वसंनिहितमग्नावादित्येप्राणे एतद्वावतत्स्वरूपंनभसःखंवैतन्मूर्तिस्ययद्दोधुम्निस्येतदद्भुर
मन्नेनैवतदुद्धव्यमस्फुदपत्स्फुस्थ सत्यजस्वंब्रह्मलब्धीयालबं वायैवैतस्समीरणोप्रकाशयन्नेप
कोलम् स्थानीयमेतत्रधूमस्येवसमीरणो नभसिप्रशाखवयेवोक्रम्यस्कंधस्कंधमप
नुसरत्यप्सु प्रक्षेपकोलवणस्येवघृतस्येवोस्यभिवान्निध्यमनुर्विस्तृतरिवैतुदिय
वोदाहरंत्यथ कस्माद्वुच्यते वैद्युतोयस्मादुच्चारितमात्रएवसर्वं शरीरंविद्योतय
ति तस्मादोमित्यनेनैतदुपासीतापरिमितंतेजः॥पुरुषश्चाक्षुषोयोयंदक्षिणेक्षिण्य
वस्थितः॥इंद्रोयमस्यजायेयंसव्येवाक्षिण्यवस्थिता॥समागमस्तयोरेवहृदयांतर्गतःसु
षौ॥तेजस्तल्लोहितस्यात्रपिंडएवात्रयोस्तयोः॥हृदयादायता तावच्चक्षुष्यस्मिन्प्रतिष्ठिता॥ श्री
॥सारणीसा तयोर्नाडीद्वयोरेकाद्विधासती॥॥मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥ २४

२नाडी द्वारा

२-अकारउकारमकार

२५ मारुतस्फूरसिवन्मेंडूंजनयतिस्वरं॥ खजाग्नियोगा हृदिसंगयुक्तं मरुतो र्ध्वमुद्दिरण:
कंठदेशाज्जिह्वाग्रदेशे अलुकैवविहिनिर्गतं मात्र कामव माहुः॥ नपश्यन्नुमस्सं
पश्यतिनरोगानोतदुखतां॥ सर्वं हि पश्यन्नु पश्यति सर्वमाप्नोति सर्वशः॥ वीक्षु
षःस्वप्नचारीवसुप्तःसुप्तात्परश्चयः॥ भेदाश्चैतेस्यचत्वारस्तेभ्यस्तुर्यंमहत्तरं॥
त्रिषुचैकपादश्चरेतब्रह्मत्रिपाद्भ्रतिचोत्तरे॥ स त्वान्नतोपयोगाथ्यार्द्धितीमात्रावो
महात्मन इतिद्वितीमात्रावो महात्मन इति॥११॥ ॥सप्तम मन्त्रपाठक: समाप्ति:मग
नमत्॥ ॥संवत् १७२७ वर्षे लिखितं शुक्लशिवनदुसुद्धारकानाथेन पंचमि फाल्गु श्री
नशुदिमंदवासरे॥ ॥शुभमस्तु सर्वजगतः॥ ॥नंदूं॥ ॥शुभं॥ ॥कल्याणं॥ ॥ २५

[illegible] नेतुवहता प्रवतणाहलै
[illegible] ग्रुणात्।गुरुश्च श्रुषा
यालक्षौतू स्ट धुाशा।तिफलं
लन्तै।मोकातीतोविभुर्दोवानि
त्रैशतोहितोमोहलोकान् तिस्सा
दोस्वालेतट्ठे प्रातफलितवष्ठ
गीयते सो प्रमाता।ह्रस्यार्तष
माणंफलमुधिधिवणा।हतिस
व्याप्तचित्तोपोधिर्मोहोद्युशद्भ
मुखविषयगः स्यात्समैषो।परोत्मा

इतिश्रीआरुणेयोपनिषत्

१०

२३/१७

१३/१

२५